संस्कृत-वार्ता:

दिनाङ्क :- 28.09.2024 प्रात: - 06:55

अथ वार्ताः विस्तरेण

<u>जम्मूकश्मीरनिर्वाचनम्</u>

जम्मूकश्मीरे विधानसभा-निर्वाचनस्य तृतीयाय अन्तिमाय च चरणाय प्रचाराभियानं सजवं प्रवर्धते। जम्मूकश्मीरे एतस्मिन् अन्तिमचरणे चत्वारिंशत्-विधानसभा-क्षेत्रेभ्य: मङ्गलवासरे मतदानं भविष्यति। मतदातृन् आक्रष्टुं विभिन्नानां राजनीतिक-दलानां नेतार: जनसभा: पथप्रदर्शन्य: च कुर्वन्ति। भाजपेतिदलस्य वरिष्ठनेता प्रधानमन्त्री नरेन्द्रमोदी अद्य जम्मूनगरे एकं जनसमागमं सम्बोधयिष्यति। कांग्रेसदलनेत्री प्रियङ्कागांधी अद्य केन्द्रशासिते एतस्मिन् प्रदेशे जनसभा: सम्बोधयिष्यति। तत्रैव हरियाणायां नवति: विधानसभासनेभ्य: मतदानं अक्टूबरमासस्य पञ्चम दिनाङ्के सुनिश्चितमस्ति। राज्येऽस्मिन् अपि प्रचाराभियानं तीव्रं जातम्।

---

<u>राष्ट्रपति तेलंगाना :</u>

राष्ट्रपति पदासीना द्रौपदी मुर्मू: अद्य तेलंगानायाः यात्रायां भविष्यति। एकदिवसीय यात्रावधौ राष्ट्रपतिः हैदराबादनगरे नालसार विधिविश्वविद्यालयस्य एकविंशतितमे दीक्षांतसमारोहे भागं भजिष्यति। सा सिकन्दराबादस्य राष्ट्रपतिनिलयम् इत्यत्र भारतीयकलामहोत्सवस्य उद्घाटनम् अपि करिष्यति। अष्टदिवसीयः कलामहोत्सवः अरुणाचलप्रदेश, असम, मणिपुर, मेघालय, मिजोरम, नागालैण्ड, सिक्किम, त्रिपुरा राज्याणां च कला, संस्कृतिः, शिल्पं, पाकवैविध्यं च प्रदर्शयिष्यति।

-----------------------------------------------

रेलवे-विशेषयानानि :

भारतीयरेलवे दुर्गापूजा, दीपावली, छठपूजायाः च कृते आगामि उत्सवऋतौ अक्टोबर मासस्य प्रथम दिनादारभ्य नवम्बर मासस्य त्रिंशत् दिनांक पर्यन्तं षट्सहस्राधिकानि विशेषरेलयानानि चालयिष्यति। प्रतिवर्षं भारतीयरेलवे उत्सवकाले विशेषरेलयानानि चालयति येन लक्षशः यात्रिणां यात्रा सुलभा भवति । विगतेभ्यः वर्षेभ्यः अपेक्षया अस्मिन् वर्षे विशेषरेलयानेषु उल्लेखनीयवृद्धिः अभवत्। गतवर्षे अस्मिन् काले ऊनत्रिंशदधिक चतुः शतोत्तर चतुः सहस्राणि विशेषरेलयानानि प्रचालितानि आसन् ।

-----------------------------------------------

ब्रिटेन-भारत संयुक्तराष्ट्रसङ्घः -

संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि (UNSC) इत्यस्मिन् स्थायिपदस्य कृते भारतस्य पक्षे समर्थनं दत्वा ब्रिटेनस्य प्रधानमन्त्री कीर स्टारमरः अपि अमेरिका-फ्रांस्-देशयोः नेतृभिः सह सम्मिलितः अस्ति। न्यूयॉर्कनगरे (UNGA) इति संयुक्तराष्ट्रसङ्घस्य महासभायाः ऊनासीति तमे अधिवेशने सम्बोधयन् स्टारमरमहोदयः वैश्विकबहुपक्षीयव्यवस्थां अधिकं प्रतिनिधिं प्रतिक्रियाशीलं च कर्तुं सुधारस्य आह्वानं कृतवान्। सः आफ्रिका-ब्राजील्-जापान-जर्मनी-देशानां सुरक्षापरिषदि स्थायि-पदानि समेत्य निर्वाचितसदस्यानां कृते अधिकानां आसनानां च समर्थनम् अपि अकरोत् ।

-----------------------------------------------

अर्थव्यवस्था-प्रतिवेदनं

वित्तमन्त्रालयेन प्रकाशितायां अगस्तमासाय स्वीयायां मासिक-आर्थिक-समीक्षायां निगदितं यत् राष्ट्रं प्रवर्तमाने वित्तीय-वर्षे षड्-दशमलव पञ्चप्रतिशततः सप्तप्रतिशतं यावत् सकल-गृहोत्पादस्य वृद्धिं प्राप्तुं सज्जमस्ति। प्रतिवेदने

लिखितं यत् प्रथमे त्रैमासिके आर्थिकगतिः समेधमाना आसीत् या सर्वेषु कृष्येतर-क्षेत्रेषु पञ्चप्रतिशतं यावत् वृद्धिसमर्थनं अमिलत्।

---

<u>बैडमिण्टनप्रतिस्पर्धा</u>

बैडमिण्टन्-क्रीडायां अद्य मकाऊ ओपन-क्रीडायाः उपांत्यचक्रीय-क्रीडायां त्रिसा जॉली-गायत्री-गोपीचण्दयोः महिलायुगलः ताइवान-देशस्य हसीह-पेइ-शान्-हङ्ग-एन्-त्सु-इत्येतौ सम्मुखी करिष्यतः। भारतीयमानकसमयानुसारं प्रातः पञ्चशन्निमेषाधिक दश वादने अस्याः क्रीडायाः आरम्भः निर्धारितः अस्ति ।

।। इति वार्ताः।।